# राष्ट्रियसंस्कृतविश्वविद्यालयः , तिरुपतिः

[संसदः अधिनियमेन प्रतिष्ठापितः केन्द्रीयविश्वविद्यालयः]

# संस्कृतविकासकेन्द्रम्

# Centre for Sanskrit Language Promotion

# वार्षिकप्रतिवेदनम्



अध्यक्षः

आचार्य वि.मुरलीधरशर्मा



संयोजकः

आचार्य प्रह्लाद् रा.जोशी

सदस्याः









परमेश्वरः किरणभट्टः शङ्करबेहरः प्रीतिः

# संस्कृतविकासकेन्द्रम्

एकस्य संस्कृतविश्वविद्यालयस्य दायित्वं केवलं शास्त्राणां संरक्षणम् एव न अपि तु सामाजिकदायित्वमपि विद्यते । शास्त्राणां रक्षणेन सह संस्कृतभाषायाः प्रसारं प्रचारम् अपि कुर्यात् । अतः तादृशं किञ्चित् केन्द्रम् आवश्यकं यत्र भारतीयसंस्कृतिसम्बद्धान् विचारान् पाठयितुं व्यवस्था स्यात्, देशभक्तानां जीवनचरित्राणि श्रोतुम् अवसरः च स्यात्, यत्र च अनौपचारिकं शिक्षणं स्यात् यत्र च परीक्षायाः गृहपाठस्य वा भारः बालानां मनसि भयं न जनयेत्, यत्र च बालाः मातुः उत्सङ्ग इव उत्साहेन हसन्तः क्रीडन्तः एवम् अस्माकं संस्कृतिसम्बद्धान् विचारान् जानीयुः इत्येतस्याः कल्पनायाः मूर्तः आकारः एव "संस्कृतविकासकेन्द्रम्" ।

राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिः आचार्य वि.मुरलीधरशर्मवर्यः संस्कृतविकासकेन्द्रस्य समुद्घाटनम् अकरोत् । एतस्मात् केन्द्रात् नागरेभ्यः बालेभ्यः सर्वेभ्यः संस्कृतभाषायाः एवम् अस्माकं संस्कृतिसम्बद्धान् विचारान् पठयन्ति ।

## संस्कृतविकासकेन्द्रस्य प्रधानकार्याणि एवं सन्ति -

- बालकेन्द्राणामयोजनम्।
- सम्भाषणशिबिराणामयोजनम्।
- गीताजयन्त्यादिपर्वणां निर्वहणम्।
- नुतनतया प्रविष्टानां भाषादक्षतायाः विकासः।
- अनुवर्तिकक्ष्यायाः निर्वहणम्।

- विशेषोपन्यासाः।

अस्मिन् शैक्षिकवर्षे करोनासङ्क्रमणात् सर्वत्र गृहबन्धनमास्ति इत्यतः वयमपि विद्यालयं गत्वा न अपाठयन् । सर्वविधकार्याणि अन्तर्जालमाध्यमेन अकुर्महि । विशिष्य बालेभ्यः बालगोकुलम्, नागरिकेभ्यः सम्भाशणशिबिरम्, भगवद्गीतकक्ष्या , षाण्मासिकपाठ्यक्रमस्य पाठनम्, इत्यादयः कार्यक्रमाः सञ्चाल्यन्ते ।

# बालगोकुलम् [Online]

अद्यतने आधुनिकयुगे संस्कृतिः क्षीयमाणा वर्तते । तस्याः पुनरुज्जीवनाय समर्थाः अद्यतनाः बालाः एव । अद्यतनबालाः एव नवभारतस्य निर्मातारः इति मन्वानाः तिरुपतिस्थस्य राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतिः आचार्य वि.मुरलीधरशर्मवर्यः बालगोकुलम् इत्याख्यायाः अन्तर्जालकक्ष्यायाः आरम्भम् अकरोत् । बालेभ्य जीवनस्य मूल्यं, भारतस्य संस्कृतेः विषये परिकल्पनाय एनं सङ्कल्पम् अकरोत् ।

करोनासङ्क्रमणस्य कारणेन सर्वत्र गृहबन्धनम् अवर्तत अतः विद्यालयं गत्वा पाठयितुम् न अशक्नुवन् । तदर्थं अन्तर्जालमाध्यमेन विशिष्य बालान् पाठयितुं योजनाम् अकरोत् कुलपतिः । तस्मिन् एव सम्दर्भे बालेभ्यः विद्यालयः नासन् पुनः सर्वेऽपि गृहे एव अवर्तन्त । एतत् सर्वं मानसि निधाय एतस्याः कक्ष्यायाः आरम्भम् अकरोत् ।

पञ्चभ्यः वर्षेभ्यः केवलं तिरुपतिस्थ बालान् एव संस्कृतम् अपाठयत् विश्वविद्यालयः । "पाठयेम संस्कृतं जगति सर्वमानवान्" इति वाक्यानुगुणं कालानुगुणं च प्रपञ्चे विद्यमान्

सर्वान् संस्कृतानुरागीन् संस्कृतंपाठयामः इति सदुद्देश्येण 2020 तमे शैक्षिकवर्षे जुलैमासे 15 दिनाङ्के आचार्यस्य विरिवेण्टि मुरलीधरशर्मवर्यस्य करकमलाभ्यां बालगोकुलस्य आरम्भः अभवत् । एषः एकवर्षात्मकः पाठ्यक्रमः विद्यते ।

बालगोकुले न केवलं भारतीयाः छात्राः पठन्ति अपि तु वैदेशिकच्छात्राः अपि पठन्ति । अस्यां कक्ष्यायां चतुर्दशदेशेभ्यः 53 छात्राः पठन्ति । भारतदेशस्य विभिन्नेभ्यः प्रान्तेभ्यः 121 छात्राः वर्तन्ते । आहत्य बालगोकुले 174 छात्राः संस्कृतम् अपठन् ।

तेषां विवरणम् एवम् अस्ति । यथा -

| अनु.क्र. | देशस्य नाम | छात्रसङ्ख्या |
|---|---|---|
| 1. | Australia | 5 |
| 2. | Bahrain | 1 |
| 3. | Canada | 2 |
| 4. | Fairfax | 1 |
| 5. | Germany | 1 |
| 6. | Manama | 1 |
| 7. | Saudi Arabia | 3 |
| 8. | Singapore | 2 |
| 9. | UAE | 2 |
| 10. | UK | 2 |
| 11. | US | 6 |
| 12. | USA | 24 |
| 13. | Kuwait | 2 |
| 14. | London | 1 |
| 15. | Bharath (India) | 121 |

| | | |
|---|---|---|
| | Total | 174 |

बालगोकुलकक्ष्या केवलं भारतीयानां भानुवासरे भवति । एवं वैदेशिकानां सोमवासरे प्रातः 4:30 वादने तेषां कालानुगुणं भवति । भारतीयच्छात्राणां गणत्रयं विद्यते । वैदेशिकानामेकः गणः वर्तते । भारतीयानां भारतीयकालानुगुणं कक्ष्यायाः भवन्ति ।

बालगोकुले न केवलं संस्कृतसम्भाषणमेव पाठयन्ति अपि तु श्लोकान्, सङ्ख्याः, संस्कृतगीतानि, नित्यपञ्चाङ्गम् (मासानां, नक्षत्राणां नामानि इत्यादिनि), भाषाक्रीडाः, कथाः, संस्कृतगुणनम् एवं विभिन्नान् विषयान् पाठयन्ति । कक्ष्यायां विभिन्नोपकरणाम् (तन्त्रांशानां) उपयोकं कुर्वन्ति । एषा कक्ष्या केवलम् अन्तर्जालमाध्यमेनैव भवति ।

जुलैमासस्य 15 दिनाङ्कतः आरभ्य मेमासस्य 30 दिनाङ्कपर्यन्तं 45 कक्ष्याः अभवन् । प्रतिमासं पितृभ्यां सह समावेशम् अपि भवति । समेषां छात्राणां स्तरत्रये परीक्षा चालिता । तासु 75 छात्रा द्वितीयस्तरं प्रति चिताः सन्ति । पालकानां प्रतिपुष्टिः अपि उत्तमा विद्यते ।

अत्र पाठनार्थं संस्कृतभारत्याः बालकेन्द्रम् इत्यस्य पुस्तकस्य पाठ्यक्रमस्य अनुसरणं कृतवन्तः । बालगोकुलं 1:30 होरात्मिका कक्ष्या ।



# षाण्मासिकपाठ्यक्रमे पाठनम्

करोनासङ्क्रमणकाणे विश्वविद्यालयः अन्तर्जालपाठ्यक्रमस्य आरम्भम् अकृषत । अस्मिन् त्रिंशधिकाः पाठ्यक्रमाः वर्तन्ते । तेषु अन्यतः जनप्रसिद्धश्च Certificate Program in Functional Sanskrit पाठ्यक्रमः । अस्मिन् पाठ्यक्रमे पञ्चाशतधिकशतं छात्राः वर्तन्ते । एतस्य पाठनार्थं विकासकेन्द्रस्य सदस्याः सहय्यम् अकुर्मन् । भारतीयानं छात्राणां गणद्वयम्, वैदेशिकानामेकः गणः विद्यते । तेभ्यः संस्कृतसम्भाशणशिबिरम्, सामान्यव्याकरणस्य पाठान् एवमित्यादीन् विषयान् पाठयन्ति सदस्याः ।

एतेन प्रभाविताः जनाः अग्रिमे पाठ्यक्रमे प्राविशन् । पुनः केचन छात्राः विभिन्नपाठ्यक्रमे प्राविशन् एवं विश्वविद्यालये प्रक्-शास्त्री इत्यादिषु कक्ष्यासु प्राविशन् ।

# त्रैमासिकपाठ्यक्रमे पाठनम्

करोनासङ्क्रमणकाणे विश्वविद्यालयः अन्तर्जालपाठ्यक्रमस्य आरम्भम् अकृषत । अस्मिन् त्रिंशधिकाः पाठ्यक्रमाः वर्तन्ते । तेषु अन्यतः Basic Sanskrit Program पाठ्यक्रमः । अस्मिन् अपि अस्मदीयाः सदस्याः अपाठयन् । अस्मिन् पाठ्यक्रमे सम्भाषणशिबिरं वयं चालितवन्तः । अस्मिन् अपि भारतीयानां कश्चन गणः वैदेशिकानां कश्चन गणः अविद्यत ।

# अन्तर्जालकक्ष्यायाः कानिचन चित्राणि









